# श्रीमद् भागवत रसिक कुटुंब

## श्रीदुर्गासप्तशती (द्वादश अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥ अथ श्रीदुर्गासप्तशती ॥

॥ अथ द्वादशोऽध्यायः ॥

। ध्यानम् ।

ॐ विद्युद्दामसमप्रभां(म्) मृगपतिस्कन्धस्थितां(म्) भीषणां(ङ्),

कन्याभिः(ख्) करवालखेटविलसद्धस्ताभिरासेविताम् ।

हस्तैश्चक्रगदासिखेटविशिखां(म्)श्चापं(ङ्) गुणं(न्) तर्जनीं(म्),

बिभ्राणामनलात्मिकां(म्) शशिधरां(न्) दुर्गां(न्) त्रिनेत्रां(म्) भजे ॥

ॐ देव्युवाच ॥ 1॥

एभिः(स्) स्तवैश्च मां(न्) नित्यं(म्), स्तोष्यते यः(स्) समाहितः ।

तस्याहं(म्) सकलां(म्) बाधां(न्), नाशयिष्याम्यसं(म्)शयम् ॥ 2॥

मधुकैटभनाशं(ञ्) च, महिषासुरघातनम् ।

कीर्तयिष्यन्ति ये तद्वद्, वधं(म्) शुम्भनिशुम्भयोः ॥ 3॥

अष्टम्यां(ञ्) च चतुर्दश्यां(न्) , नवम्यां(ञ्) चैकचेतसः ।
श्रोष्यन्ति चैव ये भक्त्या, मम माहात्म्यमुत्तमम् ॥ 4॥

न तेषां(न्) दुष्कृतं(ङ्) किञ्चिद्, दुष्कृतोत्था न चापदः ।
भविष्यति न दारिद्र्यं(न्) , न चैवेष्टवियोजनम् ॥ 5॥

शत्रुतो न भयं(न्) तस्य, दस्युतो वा न राजतः ।
न शस्त्रानलतोयौघात्- कदाचित्सम्भविष्यति ॥ 6॥

तस्मान्ममैतन्माहात्म्यं(म्), पठितव्यं(म्) समाहितैः ।
श्रोतव्यं(ञ्) च सदा भक्त्या, परं(म्) स्वस्त्ययनं(म्) हि तत् ॥ 7॥

उपसर्गानशेषां(म्)स्तु, महामारीसमुद्भवान् ।
तथा त्रिविधमुत्पातं(म्), माहात्म्यं(म्) शमयेन्मम ॥ 8॥

यत्रैतत्पठ्यते सम्यङ्- नित्यमायतने मम ।
सदा न तद्विमोक्ष्यामि, सान्निध्यं(न्) तत्र मे स्थितम् ॥ 9॥

बलिप्रदाने पूजाया- मग्निकार्ये महोत्सवे ।
सर्वं(म्) ममैतच्चरित- मुच्चार्यं(म्) श्राव्यमेव च ॥ 10॥

जानताऽजानता वापि, बलिपूजां(न्) तथा कृताम् ।

प्रतीच्छिष्याम्यहं(म्) प्रीत्या, वह्निहोमं(न्) तथा कृतम् ॥ 11॥

शरत्काले महापूजा , क्रियते या च वार्षिकी ।
तस्यां(म्) ममैतन्माहात्म्यं(म्) , श्रुत्वा भक्तिसमन्वितः ॥ 12॥

सर्वाबाधाविनिर्मुक्तो, धनधान्यसमन्वितः ।
मनुष्यो मत्प्रसादेन, भविष्यति न सं(म्)शयः ॥ 13॥

श्रुत्वा ममैतन्माहात्म्यं(न्), तथा चोत्पत्तयः(श्) शुभाः ।
पराक्रमं(ञ्) च युद्धेषु, जायते निर्भयः(फ्) पुमान् ॥ 14॥

रिपवः(स्) सङ्क्षयं(यँ) यान्ति , कल्याणं(ञ्) चोपपद्यते ।
नन्दते च कुलं(म्) पुं(म्)सां(म्) , माहात्म्यं(म्) मम शृण्वताम् ॥ 15॥

शान्तिकर्मणि सर्वत्र , तथा दुः(स्)स्वप्नदर्शने ।
ग्रहपीडासु चोग्रासु, माहात्म्यं(म्) शृणुयान्मम ॥ 16॥

उपसर्गाः(श्) शमं(यँ) यान्ति , ग्रहपीडाश्च दारुणाः ।
दुःस्वप्नं(ञ्) च नृभिर्दृष्टं(म्), सुस्वप्नमुपजायते ॥ 17॥

बालग्रहाभिभूतानां(म्), बालानां(म्) शान्तिकारकम् ।
सङ्घातभेदे च नृणां(म्), मैत्रीकरणमुत्तमम् ॥ 18॥

दुर्वृत्तानामशेषाणां(म्), बलहानिकरं(म्) परम् ।

रक्षोभूतपिशाचानां(म्), पठनादेव नाशनम् ॥ 19॥

सर्वं(म्) ममैतन्माहात्म्यं(म्), मम सन्निधिकारकम् ।
पशुपुष्पार्घ्यधूपैश्च, गन्धदीपैस्तथोत्तमैः ॥ 20॥

विप्राणां(म्) भोजनैर्होमैः(फ्), प्रोक्षणीयैरहर्निशम् ।
अन्यैश्च विविधैर्भोगैः(फ्), प्रदानैर्वत्सरेण या ॥ 21॥

प्रीतिर्मे क्रियते सास्मिन्, सकृत्सुचरिते श्रुते ।
श्रुतं(म्) हरति पापानि, तथाऽऽरोग्यं(म्) प्रयच्छति ॥ 22॥

रक्षां(ङ्) करोति भूतेभ्यो, जन्मनां(ङ्) कीर्तनं(म्) मम ।
युद्धेषु चरितं(यँ) यन्मे, दुष्टदैत्यनिबर्हणम् ॥ 23॥

तस्मिञ्छ्रुते वैरिकृतं(म्), भयं(म्) पुं(म्)सां(न्) न जायते ।
युष्माभिः(स्) स्तुतयो याश्च, याश्च ब्रह्मर्षिभिः(ख्) कृताः ॥ 24॥

ब्रह्मणा च कृतास्तास्तु, प्रयच्छन्तु शुभां(म्) मतिम् ।
अरण्ये प्रान्तरे वापि, दावाग्निपरिवारितः ॥ 25॥

दस्युभिर्वा वृतः(श्) शून्ये, गृहीतो वापि शत्रुभिः ।
सिं(म्)हव्याघ्रानुयातो वा, वने वा वनहस्तिभिः ॥ 26॥

राज्ञा क्रुद्धेन चाज्ञप्तो, वध्यो बन्धगतोऽपि वा ।

आघूर्णितो वा वातेन, स्थितः(फ्) पोते महार्णवे ॥ 27॥

पतत्सु चापि शस्त्रेषु, सङ्ग्रामे भृशदारुणे ।
सर्वाबाधासु घोरासु, वेदनाभ्यर्दितोऽपि वा ॥ 28॥

स्मरन्ममैतच्चरितं(न्), नरो मुच्येत सङ्कटात् ।
मम प्रभावात्सिं(म्)हाद्या दस्यवो वैरिणस्तथा ॥ 29॥

दूरादेव पलायन्ते, स्मरतश्चरितं(म्) मम ॥ 30॥

ऋषिरुवाच ॥ 31॥

इत्युक्त्वा सा भगवती, चण्डिका चण्डविक्रमा ॥ 32॥

पश्यतामेव देवानां(न्), तत्रैवान्तरधीयत ।
तेऽपि देवा निरातङ्काः(स्), स्वाधिकारान् यथा पुरा ॥ 33॥

यज्ञभागभुजः(स्) सर्वे, चक्रुर्विनिहतारयः ।
दैत्याश्च देव्या निहते, शुम्भे देवरिपौ युधि ॥ 34॥

जगद्विध्वं(म्)सिनी तस्मिन्, महोग्रेऽतुलविक्रमे ।
निशुम्भे च महावीर्ये, शेषाः(फ्) पातालमाययुः ॥ 35॥

एवं(म्) भगवती देवी , सा नित्यापि पुनः(फ्) पुनः ।

सम्भूय कुरुते भूप, जगतः(फ्) परिपालनम् ॥ 36॥

तयैतन्मोह्यते विश्वं(म्), सैव विश्वं(म्) प्रसूयते ।
सा याचिता च विज्ञानं(न्), तुष्टा ऋद्धिं(म्) प्रयच्छति ॥ 37॥

व्याप्तं(न्) तयैतत्सकलं(म्), ब्रह्माण्डं(म्) मनुजेश्वर ।
महाकाल्या महाकाले, महामारीस्वरूपया ॥ 38॥

सैव काले महामारी , सैव सृष्टिर्भवत्यजा ।
स्थितिं(ङ्) करोति भूतानां(म्) , सैव काले सनातनी ॥ 39॥

भवकाले नृणां(म्) सैव, लक्ष्मीर्वृद्धिप्रदा गृहे ।
सैवाभावे तथालक्ष्मीर्- विनाशायोपजायते ॥ 40॥

स्तुता सम्पूजिता पुष्पैर्- धूपगन्धादिभिस्तथा ।
ददाति वित्तं(म्) पुत्रां(म्)श्च, मतिं(न्) धर्मे गतिं(म्) शुभाम् ॥ 41॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
फलस्तुतिर्नाम द्वादशोऽध्यायः ॥

उवाच 2, अर्धश्लोकौ 2, श्लोकाः 37, एवम् 41, एवमादितः 671

# श्रीदुर्गासप्तशती (त्रयोदश अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥श्रीदुर्गासप्तशती ॥

॥ अथ त्रयोदशोऽध्यायः ॥

। ध्यानम् ।

ॐ बालार्कमण्डलाभासां(ञ्), चतुर्बाहुं(न्) त्रिलोचनाम् ।
पाशाङ्कुशवराभीतिर्- धारयन्तीं(म्) शिवां(म्) भजे ॥

ॐ ऋषिरुवाच ॥ 1॥

एतत्ते कथितं(म्) भूप, देवीमाहात्म्यमुत्तमम् ।
एवं(म्)प्रभावा सा देवी, ययेदं(न्) धार्यते जगत् ॥ 2॥

विद्या तथैव क्रियते, भगवद्विष्णुमायया ।
तया त्वमेष वैश्यश्च, तथैवान्ये विवेकिनः ॥ 3॥

मोह्यन्ते मोहिताश्चैव, मोहमेष्यन्ति चापरे ।
तामुपैहि महाराज, शरणं(म्) परमेश्वरीम् ॥ 4॥

आराधिता सैव नृणां(म्), भोगस्वर्गापवर्गदा ॥ 5॥

मार्कण्डेय उवाच ॥ 6॥

इति तस्य वचः(श्) श्रुत्वा, सुरथः(स्) स नराधिपः ॥ 7॥

प्रणिपत्य महाभागं(न्), तमृषिं(म्) शंसितव्रतम् ।
निर्विण्णोऽतिममत्वेन, राज्यापहरणेन च ॥ 8॥

जगाम सद्यस्तपसे, स च वैश्यो महामुने ।
सन्दर्शनार्थमम्बाया, नदीपुलिनसंस्थितः ॥ 9॥

स च वैश्यस्तपस्तेपे, देवीसूक्तं(म्) परं(ञ्) जपन् ।
तौ तस्मिन् पुलिने देव्याः(ख्), कृत्वा मूर्तिं(म्) महीमयीम् ॥ 10॥

अर्हणां(ञ्) चक्रतुस्तस्याः(फ्), पुष्पधूपाग्नितर्पणैः ।
निराहारौ यताहारौ, तन्मनस्कौ समाहितौ ॥ 11॥

ददतुस्तौ बलिं(ञ्) चैव, निजगात्रासृगुक्षितम् ।
एवं(म्) समाराधयतोस्- त्रिभिर्वर्षैर्यतात्मनोः ॥ 12॥

परितुष्टा जगद्धात्री, प्रत्यक्षं(म्) प्राह चण्डिका ॥ 13॥

देव्युवाच ॥ 14॥
यत्प्रार्थ्यते त्वया भूप, त्वया च कुलनन्दन ।
मत्तस्तत्प्राप्यतां(म्) सर्वं(म्), परितुष्टा ददामि तत् ॥ 15॥

मार्कण्डेय उवाच ॥ 16॥

ततो वव्रे नृपो राज्य- मविभ्रं(म्)श्यन्यजन्मनि ।

अत्रैव च निजं(म्) राज्यं(म्), हतशत्रुबलं(म्) बलात् ॥ 17॥

सोऽपि वैश्यस्ततो ज्ञानं(वँ), वव्रे निर्विण्णमानसः ।
ममेत्यहमिति प्राज्ञः(स्), सङ्गविच्युतिकारकम् ॥ 18॥

देव्युवाच ॥ 19॥

स्वल्पैरहोभिर्नृपते, स्वं(म्) राज्यं(म्) प्राप्स्यते भवान् ॥ 20॥

हत्वा रिपूनस्खलितं(न्), तव तत्र भविष्यति ॥ 21॥

मृतश्च भूयः(स्) सम्प्राप्य, जन्म देवाद्विवस्वतः ॥ 22॥

सावर्णिको नाम मनुर्-भवान् भुवि भविष्यति ॥ 23॥

वैश्यवर्य त्वया यश्च, वरोऽस्मत्तोऽभिवाञ्छितः ॥ 24॥

तं(म्) प्रयच्छामि सं(म्)सिद्ध्यै, तव ज्ञानं(म्) भविष्यति ॥ 25॥
मार्कण्डेय उवाच ॥ 26॥

इति दत्त्वा तयोर्देवी, यथाभिलषितं(वँ) वरम् ॥ 27॥

बभूवान्तर्हिता सद्यो, भक्त्या ताभ्यामभिष्टुता ।
एवं(न्) देव्या वरं(लँ) लब्ध्वा, सुरथः क्षत्रियर्षभः ॥ 28॥

सूर्याज्जन्म समासाद्य, सावर्णिर्भविता मनुः ॥ 29॥

एवं(न्) देव्या वरं(लँ) लब्ध्वा, सुरथः क्षत्रियर्षभः ।
सूर्याज्जन्म समासाद्य, सावर्णिर्भविता मनुः ॥ क्लीं ॐ ॥

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
सुरथवैश्ययोर्वरप्रदानं(न्) नाम त्रयोदशोऽध्यायः ॥

उवाच 6, अर्धश्लोकाः 11, श्लोकाः 12, एवम् 29 एवमादितः 700

समस्ता उवाचमन्त्राः 57, अर्धश्लोकाः 42, श्लोकाः 535, अवदानानि 66 ॥

॥ श्रीसप्तशतीदेवीमाहात्म्यं समाप्तम् ॥
॥ ॐ तत् सत् ॐ ॥